# भारतीय शिक्षा बोर्ड
# आदर्श-प्रश्न-पत्रम् - अर्धवार्षिक परीक्षा
# संस्कृतम् - कक्षा 5
# सत्रम् - 2025-26

**निर्धारित समय** - 2 घंटा **अधिकतम अंक** - 50

**निर्देश:**

- प्रश्नों को ध्यानपूर्वक पढ़ें।
- प्रश्न पत्र को पढ़ने के लिए अतिरिक्त 10 मिनट का समय दिया गया है। इस दौरान छात्र केवल प्रश्न पत्र पढ़ेंगे।
- प्रश्न पत्र में कुल 09 प्रश्न है और सभी प्रश्न अनिवार्य है।
- इस प्रश्न पत्र में तीन खण्ड हैं :
  - ➢ खण्ड - क : **पठित-अवबोधनम्** - 20 अंक
  - ➢ खण्ड - ख : **रचनात्मक-कार्यम्** - 20 अंक
  - ➢ खण्ड - ग : **प्रयुक्त-व्याकरणम्** - 10 अंक

---

## खण्ड- 'क' (पठित-अवबोधनम्)

**1. गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **5×2=10**

एकस्मिन् समुद्रतटे अनेके वृक्षाः आसन्। वृक्षेषु अनेकानि नीडानि आसन्। तत्र अनेके खगाः वसन्ति स्म। एकः वानरः अपि तत्र वसति स्म। सः वृक्षस्य फलानि खादित्वा वृक्षात् वृक्षं कूर्दित्वा खगैः सह क्रीडित्वा सुखेन कालं यापयति स्म। एकदा अतिवृष्टिरभवत्। स्थलं जलमयम् अभवत्। वानरः इतस्ततः कूर्दितुं न अशक्नोत्। सः चिन्तयति- अहं किं करोमि ? तदैव एकः डोल्फिनमत्स्यः तटम् आगच्छति। स दुःखितं वानरम् अवलोक्य पृच्छति-भ्रातः ! किं तव दुःखस्य कारणम् ? तव मुखे कथं ग्लानता दृश्यते ? वानरः कथयति - किं न पश्यसि वृष्टेः कारणात् कीदृशं वातावरणं जातम् ? सर्वत्र जलम् एव दृश्यते। जीवनं दुष्करं जातम्। किं करोमि ? कुत्रापि गन्तुं न शक्नोमि। जीवनं नीरसं जातम्।

**क. एकेन पदेन उत्तरयत -** **5×1=5**

(1) कुत्र अनेके वृक्षा: आसन् ?

(2) अनेके खगा: कुत्र वसन्ति स्म ?

(3) फलानि क: खादति स्म ?

(4) वानर: कै: सह क्रीडति स्म ?

(5) स्थलं किम् अभवत् ?

**ख. अधः प्रदत्तनिर्देशानुसारं रिक्तं स्थानं पूरयत-** 5×1=5

(1) समुद्रतटे ...................... वृक्षा: आसन्।

(क) अनेका: (ख) अनेकानि (ग) अनेके

(2) "अहं किं करोमि" अत्र क्रियापदं किम् अस्ति ?

(क) अहम् (ख) किम् (ग) करोमि

(3) तटे अन्य: एक: क: आगच्छति ?

(क) सर्प: (ख) बिडाल: (ग) डोल्फिनमत्स्य:

(4) स: चिन्तयति । अत्र "स:" इति सर्वनामपदं कस्य कृते ?

(क) खगा: (ख) पक्षिण: (ग) वानर:

(5) जीवनं कीदृशं जातम् ?

(क) सुकरमम् (ख) दुष्करम् (ग) सुखमयम्

**प्रश्न 2. क - भागस्य पंक्तिः ख - भागस्य पङ्क्त्या सह यथायोग्यं मेलयत -** 1×5=5

| क-भागः | ख-भागः |
|---|---|
| ग्रामे नगरे भुवि वा गगने | श्रममनुपदमपनयसि । |
| दीने धनिके कुजने सुजने | अविशेषा तव गतिः । |
| कुमुदामोदं दूषितधूमम् | तनुतापं त्वं हरसि । |
| धृतभाराणां कृतकार्याणां | अविकलमनसा वहसि । |
| कन्दुकक्षेपणकेलिरतानां | भेदविरहिता मतिः । |

**प्रश्न 3. चित्रं दृष्ट्वा, पट्टिकातः नाम चित्वा, अधः लिखत—** 1×5=5

ग्रामः, भारवाहकः, पुष्पम्, धनिकः, निर्धनः



......................



........................



........................





..................... .....................

## खण्ड 'ख' (रचनात्मक-कार्यम्)

**प्रश्न 4. पट्टिकागतानि षण्णाम् ऋतूनां नामानि यथाक्रमं लिखत -** 1×6=6

| शिशिरः, ग्रीष्मः, वर्षाः, वसन्तः, शरद्, हेमन्तः |
|---|

1-________________ 2-________________ 3-________________

4-________________ 5- ________________ 6-________________

**प्रश्न 5. पट्टिकायां केचन शब्दाः लिखिताः सन्ति। ततः समुचितं शब्दं चित्वा रिक्तस्थानं पूरयत –** (1×6=6)

| पावयन्ति, करोषि, पूजयति, वितरन्ति, कल्पयामः, वीराः |
|---|

(क) भक्तः ईश्वरं.......................................................................।

(ख) वृक्षाः वायुमण्डलं.....................................................................।

(ग) परोपकारिणः जनाः निर्धनेभ्यः धनं.......................................................।

(घ) वयं सर्वेभ्यः अभयं....................................................................।

(ङ) त्वं कस्यचित् हानिं न.................................................................।

(च) प्रयत्नेन ................................................................. समुद्रं तरन्ति।

**प्रश्न 6. अधोलिखितानि विशेषणानि विशेष्यैः सह मेलयत -** 1×5= 5

| | |
|---|---|
| 1. चक्रवर्ती | चाणक्यः |
| 2. विशाला | नीतिकौशलेन |
| 3. अद्भुतेन | सम्राट् |
| 4. आचार्यः | प्रजाः |
| 5. समृद्धाः | प्राकृतिकसीमा |

**प्रश्न 7. कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानं पूरयत -** 1×3=3

(क) अध्यापकः ............अनुशासनस्य पालनाय कथयति। (छात्रान् / छात्रैः / छात्राणाम्)

(ख) बालकाः...............भ्रमणाय गच्छन्ति। (बसयानेन / बसयानम् / बसयानाय)

(ग) .......................प्रतिदिनम् अनुशासनं पालयति। (प्रकृतिः / प्रकृतिम् / प्रकृत्या)

## खण्ड - 'ग' (प्रयुक्त-व्याकरणम्)

**प्रश्न 8. रेखांकितपदस्य स्थाने अभिमुखं वाक्यं दृष्ट्वा पट्टिकागतं पर्यायपदं लिखित्वा वाक्यरचनां कुरुत -** 1×5=5

| बाणेन, आकाशे, हर्षेण, विभूषितान्, क्रोडे |
|---|

(क) देवदत्तः गगने हंसम् अपश्यत्। देवदत्तः.........................हंसम् अपश्यत्।

(ख) देवदत्तः उत्पतन्तं हंसं शरेण अविध्यत्। देवदत्तः उत्पतन्तं हंसं.........................अविध्यत्।

(ग) हंसः सिद्धार्थस्य अंके अपतत्। हंसः सिद्धार्थस्य......................................... अपतत्।

(घ) बौद्धधर्मानुयायिनः एतत् पर्व महता उल्लासेन परिपालयन्ति।
बौद्धधर्मानुयायिनः एतत् पर्व महता..........................................परिपालयन्ति।

(ङ) 'बुद्धजयन्ती' पर्वणि जनाः बौद्धमठान् अलंकृतान् कुर्वन्ति।
'बुद्धजयन्ती' पर्वणि जनाः बौद्धमठान् ..........................................कुर्वन्ति।

**प्रश्न 9. पूर्णवाक्यानां सम्मुखे उत्तमपुरुषे वाक्यं रचयत -** (1×5=5)

यथा- सः यथाकालं प्रातः उत्तिष्ठति। अहं यथाकालं प्रातः उत्तिष्ठामि।

(क) सः यथाकालं विद्यालयं गच्छति। ____________ यथाकालं विद्यालयं ____________।

(ख) सः यथाकालं पठति। ____________ यथाकालं विद्यालयं ____________।

(ग) सः यथाकालं खेलति। ____________ यथाकालं विद्यालयं ____________।

(घ) सः यथाकालं वदति। ____________ यथाकालं विद्यालयं ____________।

(ङ) सः मातापित्रोः आज्ञां पालयति। ____________ मातापित्रोः आज्ञां ____________।